यः स्मरेत् सततं दुर्गां जपेत् यः परमं मनुम् ।
स जीवलोको देवेशि ! नीलकण्ठत्वमवाप्नुयात् ॥”
इति मुण्डमालातन्त्रम् ।

दुर्गाध्यक्षः, पुं, (दुर्गस्य अध्यक्षः ।) दुर्गरक्षकः । तस्य लक्षणं यथा,—
“अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षः स्मृतो राज्ञस्तद्युक्तः सर्व्वकर्म्मसु ॥”
इति मत्स्यपुराणम् ॥

दुर्गानवमी, स्त्री, (दुर्गायाः पूजोपलक्षिता नवमी ।) कार्त्तिकशुक्लनवमी । सा त्रेतायुगाद्या । तत्र जगद्धात्रीपूजा कर्त्तव्या । यथा, योगिनीतन्त्रे ।
“कार्त्तिकेऽमलपक्षे तु नवम्याञ्च विशेषतः ।
प्रगल्भाञ्च जगद्धात्रीं पूजयेद्दीपमालया ॥
तन्त्रान्तरे ।
‘त्रिकालं पूजयेद्दुर्गां मनुनैकाक्षरेण च ।
नानाबलिविधानेन गीतवाद्यपुरःसरम् ॥
कार्त्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः ।
कृत्वैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम् ॥’
कुब्जिकातन्त्रे ।
‘कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये ॥’
शक्तिसङ्गमतन्त्रे ।
‘कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम् ।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत् ॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः ।
पूजयित्वा परदिने प्रतिमां तां विसर्जयेत् ॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः ।
पुत्त्रपौत्त्रधनैश्वर्य्यसंयुतास्य भवेत् पुरी ॥
दासदासीगणैर्युक्तो मुक्तः स्यात् पापसङ्कटात् ।
विशेषतो भसंयुतां नवमीं प्राप्य साधकः ।
पूजयित्वा न्वक्षयीं तां लभते वाञ्छितं फलम् ॥’
भविष्ये ।
‘मासैश्चतुर्भिर्यत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते वीर ! नवम्यां कार्त्तिकस्य च ॥”
इति तिथितत्त्वम् ॥

दुर्गाङ्कः, पुं, (दुर्गाया आङ्का आख्या आङ्का यस्य ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

दुर्घोषः, पुं, (दुर्दुष्टः घोषो निनादो यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥ निन्दितरवः । तद्वति, त्रि ॥

दुर्जनः, त्रि, (दुर्दुष्टो जनः । “कुगतिप्रादयः ।” २ । २ । १८ । इति समासः ।) खलः । इत्यमरः । ३ । १ । ४७ ॥ (यथा, चाणक्यशतके । २४—२५ ।
“दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥
दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सः ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥”)

दुर्जयः, पुं, (दुःखेन जीयतेऽसौ । जि जये + खल् ।) कार्त्तवीर्य्यराजवंशोद्भवानन्तपुत्त्रः । इति कूर्म्मपुराणम् ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ६६ ।
“समावर्त्तो निवृत्तात्मा दुर्ज्जयो दुरतिक्रमः ॥”
दानवविशेषः । यथा, महाभारते ।१।६५।२२।
“असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥”
राक्षसविशेषः । यथा, रामायणे ।३।२६।३०।
“तं दृष्ट्वा निःसृतं पूर्व्वं राक्षसा अपि निःसृताः ।
दुर्जयः कालकाख्यश्च परुषः कालिकामुखः ॥”)
त्रि, दुर्जेयः । (यथा, देवीभागवते ।५।८।२२।
“वरदानेन धातुः स दुर्ज्जयो मधुसूदन ! ॥”)

दुर्जरा, स्त्री, (दुर्दुःखेन जीर्य्यतीति । दुर् + जॄ + अच् । ततष्टाप् ।) ज्योतिष्मती लता । इति राजनिर्घण्टः ॥ त्रि, दुर्जरः ॥ (यथा, सुश्रुते ।१।४६।
“स्वादु पाकरसं शाकं दुर्जरं हरिमन्थजम् ॥”
दुर्जयः । यथा, देवीभागवते । १ । १८ । २६ ।
“दुर्जरं वासनाजालं न शान्तिमुपजाति वै ॥”)

दुर्जातं, क्ली, (दुर्दुष्टं यथा तथा जातम् । प्रादिसमासः ।) व्यसनम् । (यथा, रघुः ।१३।७२।
“दुर्जातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरः प्रहर्त्ता ॥”)
असमञ्जसम् । इति त्रिकाण्डशेषः ॥ असम्यग्जाते, त्रि । इति मेदिनी । ते, ११४ ॥ (यथा, महाभारते । १२ । २२४ । ३३ ।
“दौष्कुलेयस्तथा मूढो दुर्जातः शक्र दृश्यते ॥”)

दुर्दान्तः, पुं, (दुर्दुःखेन दान्तो दमितः ।) कलहः । वत्सतरः । इति राजनिर्घण्टः ॥ अशान्ते, त्रि । (यथा, माघे । १२ । २२ ।
“दुर्दान्तमुत्प्लुत्य निरस्तसादिनं
सहासहाकारमलोकयज्जनः ॥”)

दुर्द्दिनं, क्ली, (दुर्दुष्टं दिनम् ।) मेघाच्छन्नदिनम् । इत्यमरः । १ । ३ । १२ ॥ (यथा, हरिवंशे । १६७ । १८ ।
“तुमुलं दुर्द्दिनञ्चासीत् सविद्युत्स्तनयित्नुमत् ।
तद्दुर्द्दिनतलं भित्त्वा नारदः प्रत्यदृश्यत ॥”
घनान्धकारः । यथा, कुमारे । ६ । ४३ ।
“यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः ।
अनभिज्ञास्तमिस्राणां दुर्द्दिनेष्वभिसारिकाः ॥”)
वृष्टिः । यथाह साङ्गः ।
“घनान्धकारे वृष्टौ च दुर्द्दिनं कवयो विदुः ॥”
(यथा, रघुः । ४ । ४१ ।
“द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्द्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥”
कुत्सितदिनम् ।)
“सुदिनं दुर्द्दिनञ्चैव सर्व्वं कर्म्मोद्भवे भव ।
तत् कर्म्म तपसां साध्यं कर्म्मणाञ्च शुभाशुभम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
“यदच्युतकथालापरसपीयूषवर्जितम् ।
तद्दिनं दुर्द्दिनं मन्ये मेघाच्छन्नं न दुर्दिनम ॥”
इत्युद्भटः ॥
(दुर्द्दिनं वर्षः घनान्धकारो वा अस्त्यस्येति । अच् । वर्षयुक्ते घनान्धकारविशिष्टे च, त्रि । यथा, हरिवंशे । ६७ । ६६ ।
“सम्प्राप्ते दुर्द्दिने काले दुर्द्दिनं भाति वै नभः ॥”
तथा, महाभारते । ८ । ६१ । २३ ।
“जीमूतैश्च दिशः सर्व्वाश्चक्रे तिमिरदुर्द्दिनाः ॥”)

दुर्द्दुरूटः, पुं, (दोलयते उत्क्षिपति आस्तिकतामिति । दोलि + बाहुलकात् कूटप्रत्ययेन साधुः ।) नास्तिकः । इति जटाधरः ॥

दुर्द्रिता, स्त्री, लताविशेषः । इति जटाधरः ॥

दुर्द्रुमः, पुं, (दुर्दुष्टो द्रुमः ।) हरित्पलाण्डुः । इति राजनिर्घण्टः ॥

दुर्ध(र्द्ध)रः, पुं, (दुर्दुःखेन ध्रियते इति । दुर् + धृ + “ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।” ३ । ३ । १२६ । इति खल् ।) नरकविशेषः । ऋषभौषधिः । इति मेदिनी । रे, १६६ ॥ पारदः । भल्लातकः । इति राजनिर्घण्टः ॥ महिषासुरस्य सेनापतिविशेषः । यथा, मार्कण्डेये ।८३।१६।
“दुर्द्धरं दुर्म्मुखञ्चोभौ शरैर्निन्ये यमक्षयम् ॥”
(धृतराष्ट्रपुत्त्रभेदः । यथा, महाभारते । ७ । १३३ । ३० ।
“नाम्बष्यन्त महेष्वासाः सोदर्य्याः पञ्च भारत ! ।
दुर्म्मर्षणो दुःसहश्च दुर्म्मदो दुर्धरो जयः ।
पाण्डवं चित्रसन्नाहास्तं प्रतीपमुपाद्रवन् ॥”
शम्बरासुरस्य मन्त्रिविशेषः । यथा, हरिवंशे । १६२ । १८ ।
“दुर्धरः केतुमाली च शत्रुहन्ता प्रमर्द्दनः ।
एतैः परिवृतोऽमात्यैर्युयुत्सुः प्रस्थितो रणे ॥”
विष्णुः । यथा, महाभारते । १३ । १४९ । ८६ ।
तस्य सहस्रनामकथने ।
“दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥”
“न शक्या धारणा यस्य प्रणिधानादिषु सर्व्वोपाधिविनिर्म्मुक्तत्वात्तथापि तत्प्रसादादतः किञ्चिद्दुःखेन धार्य्यते जन्मान्तरसहस्रेषु भावनात् तस्मात् दुर्धरः ।
‘क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥’
इति भगवद्वचनात् ॥” इति तद्भाष्ये शङ्करः ॥
तथा तत्रैव । ४२ श्लोके ।
“सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥”
“पृथिव्यादीनि धारकाण्यन्येन धारयितुमशक्यत्वात् न केनापि धारयितुं शक्यते इति दुर्धरः । दुःखेन ध्यानसमये मुमुक्षुभिर्हृदयेन धार्य्यते इति दुर्धरः ।” इति तद्भाष्यम् ॥ एतेन व्युत्पत्तिभेदात् नामभेदोत्पत्त्या न द्विरुक्तिः सहस्रनामपूर्त्तिश्च जाता ॥) दुःखधार्य्ये, त्रि । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १३४ । ६८ ।
“अथाब्रवीन्महात्मानं भारद्वाजो महारथम् ।
गृहाणेदं महाबाहो ! विशिष्टमिति दुर्धरम् ॥
अस्त्रं ब्रह्मशिरो नाम सप्रयोगनिवर्त्तनम् ॥”
दुर्जये च । यथा, महाभारते । ७।११७।६ ।
“निर्जित्य दुर्धरं द्रोणं सपदानुगमाहवे ।
हार्द्दिक्यं योधवर्य्यञ्च प्राप्तं मन्ये धनञ्जयम् ॥”)

दुर्ध(र्द्ध)र्षा, स्त्री, (दुर्दुःखेन धृष्यतेऽसौ । दुर् + धृष + खल् ।) नागदमनी । कन्थारीवृक्षः । इति राजनिर्घण्टः ॥ (पुं, धृतराष्ट्रपुत्त्रविशेषः । यथा, महाभारते । १ । ११७ । ३ ।
“विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षणः ॥”)